सौरभ्ये श्रेष्ठा एतेन श्लोक निवर्त्तकत्वमुक्तं। तादृशे विलस। विलासप्रकारमाह। हे कुचकलशतरलहारे इति। कु
चकलशयोस्तरलः हारो यस्यास्तादृशे। विलासे हारस्य तरलत्वकथनेन विपरीतरसः सूचितः आदौ कुंजद्वारे
स्थितायास्तस्याः केलिसदनप्रवेशमुपदिशति। कुसुमेति। कुसुमचयैः रचितं शुचि निर्मलं ज्योत्स्नावद्द्योत
मानं यद्वासस्य गेहं तत्र हे राधे माधवसमीपं प्रविश। हे कुसुमसुकुमारदेहे तत्र चलं विलस। यथा रचनायां
विविधपुष्पाणि शोभंते तथा त्वमपि कुसुमसुकुमारांगी तत्तदंगैः विलासं प्राप्नुहि। वसंतप्रादुर्भावे पुष्पाणां
विलासो यथा तथा माधवसमीपे त्वदंगानां विलासो भवत्विति भावः। अथ रत्युपयोगि त्रिविधं वायुं वर्णय
ति। चलेति। कीदृशे गेहे चलः त्वदंगसौरभ्य घ्राणलोलुपः यो मलयवनपवनस्तेन शीते शीतले वासगेहे
प्रविशेति संबंधः। तत्र गमनानंतर स्वरूपमाह। हे रतिवलित ललितगीते। परस्परत्वावलितं संयुक्तं अत
एव ललितं मनोहरं गीतं यस्यास्तादृशि विलस। प्रियेण सह रतिरभसोत्सोहनमधुरालापा गीता निकुर्वती
विलासं प्राप्नुहीति भावः। विततेति। पुनः कीदृशे वितताः विस्तृताः याश्चस्ताः सांनवपल्लवास्तैः घने तादृशे
वासगेहेति नात्यंतमेकांतता सखीनामप्यदृश्यता सूचिता। एवं सति निःशंकं केलिः कर्त्तव्येति ज्ञापि
तं। तदुपयोगि संबोधनं मग्रे वक्ष्यते। हे अलसपीतजघने। अलसं पीनत्वेनैव गमने मंथरं पीनं जघनं
यस्यास्तादृशि एतेन क्रीडोपयोगि सामर्थ्यं द्योतितं। तादृशी त्वं चिरं विलसेति संबंधः। पुनः कीदृशे। मधु

मुदितेति। मधुनाव संलेनतज्जनितनवीन मकरंदेन वा मुदितं यन्मधुपकुलं तेन कलितं कृतः एवो गुंजा
॥७६॥ ये वो यत्र एतेन तन्मिषेण त्वामाह्वयतीति सूचितं। तादृशे वासगेहे प्रविश। हे मदनरसेनरभसभावो यस्यास्ता
दृशि तद्रभसरसेन त्वमपि तत्सद्भावान्यकाशयंती विलसेति भावः पुनः कीदृशे। मधुरतरेति। मधुरस्तरः पिक
निकरस्य निनदस्तेन मुखे एतेनैव मेवमधुरतरकूजितं त्वमपि ककूजनरचितशोभा वर्णयति। दशनरुचि
रुचिरशिखरइति। तादृशो कूजने या प्रकटा दशनरुचिः अथवा त्वया कूजने या प्रकटा कृते प्रिये पितदनुकर
णेन प्रतिकूजनं कुर्वति सति तदा मधुरस्मितेन तव प्रकटया दशनरुचिस्तस्या रुचिरशिखरो ग्रभागस्तत्कां
ति किरणप्रचाररूपा यस्या तादृशि त्वं विलसेति संबंधः एवं सखी वचनानि श्रुण्वं ती तत्र प्रविष्टेति गीतमुपसं
हरति। विहितेति विहितः पद्मावत्याः सुखसमाजो येन तादृशे एतदनुवर्णनेन तस्याः सुखसमाजो जात इत्यर्थः
एतेन तामेव श्रावयतीति सूच्यते तेन तदर्थमेवैतद्वर्णनं कृतमित्यपि ज्ञापितं। तादृशे जयदेव कविराजराजे हे
मुरारे मंगलशतानि कुरु। कीदृशे भणति। त्वद्गुणवर्णनं कथयति। अथवा। विहितः पद्मावत्याः राधायाः सुख
समाजो येन तादृशो जयदेव कविराजराजे सखीजने हे मुरारे स प्रतिबंधक दोष निवर्त्तकः मंगलशतानि ॥७६॥
कुरु। प्रियासंगमेन क्रीडन् सखीनामस्माकं तदवलोकनजनित परमानंदरूप मंगलशतानि कुर्वितिप्रा
र्थना सूचिता। कीदृशे भणति। त्वत्केलिगीतानुवर्णनं कुर्वति। एतेनास्माकं त्वत्केलिकथनमेव जीवन

मिति ज्ञापितं। एवं सकलोद्दीपनविभावादिसामग्रीसहितं उल्लसितमन्मथकलातिमनोहरं प्रियं वीक्ष्य सालि
वादि धर्मान्प्रकटयंती प्रत्याह। त्वां चित्तेनेति। चिरं चिरकाल त्वां चिंतेन वहन्नतिश्रांतः अन्योपि भारं वहन् श्रां
तो भवति तथा त्वां वहन् जातः पुनः कंदर्पेणच तापितः तापं प्रापितः यथा पूर्वं श्रांतः पश्चान्मार्त्तंडेन तापं प्रापि
तो भवे तादृशः पुनः तृषार्त्तः पानीयमिच्छति। तथाऽयमिति पुरस्थत्वेन दर्शयति। तवसुधासंवाध बिंबाधरंपा
तु मिच्छति। सुधां संवाधते स्वमाधुर्येण तिरस्करोति तादृशं बिंबाधरं तं धेत्यर्थः। तस्मात्तृषार्तस्य पानीयंद
यमेव जीवनरूपत्वात् इति क्षणं क्षणमात्रमिह अस्याः अंकं अलंकुरु। अन्यापि शालायां स्थित्वा पानीयं
पाययति तथा त्वमस्याः संगमे लंकृत्वा तं पाययेति भावः। एवं कथने सलज्जस्मितकंपं विलोकयंती प्रत्याह। भ्रू
क्षेपेति। भ्रूक्षेपया लक्ष्मीस्तस्या लवेनैव क्रीते विक्रयेण गृहीते दासइव विक्रीते सेवकइव सेवितं पदांभो
जं येन तादृशे संभ्रमः कुतः अधुना त्वं सकलोपसेवितचरणा पृथ्वीपतिचूडामणिः अयं तु तव दासः यथै
व मनसि तथा ज्ञापयदं वादेहिराज्यं वावितरः। त्वदीयामिति संभ्रमो नोचितः। एवं सखीवचनश्रवणा
नंतरं तत्र प्रविष्टत्याह। सेति। सा राधाः ससाध्वस सानंदं च भयं मुग्धात्वेन आनंदः कामोत्साहेनेति लक्ष
णद्वयेन मध्यात्वं सूचितं। पुनः क्षणद्वय माह। गोविंदे लोलेलोचनयस्यास्तादृशी तन्मुखमाधुर्यपानार्थ
मुत्कंठयानत्रयोः लोलत्वं लज्जयाच त्वरणे भयमपीति तता लोलत्वं। पुनः कथंभूता। मंजुमंजीरसिंजा

नाकुंजंती निवेशनं प्रविवेश। केलिसदनं प्रविष्टा। ततस्तत्र यथारूपं प्रियं दृष्टवती तादृशं गीतेन व
॥७॥ र्णयति॥ ॥बराडीरागे रूपकताले॥ ॥हरिमेकरसं चिरमभिलषितविलासमिति। साहरिं एकरसं
ददर्श। साक्षादुद्बुद्ध यस्यान्मध्ये करसात्मकमित्यर्थः। सखीभिर्यथाकथितं तथैवैकरसं दृष्टवती। अ
थवा राधाविषयिकसमाधिनिश्चलीकृतांतःकरणेंद्रियादि साक्षादाविर्भूततत्स्वरूपात्मकत्वेनैक
रसं तदेकं भावरूपं पूर्वं दृष्टवती। एकंरूपता कथं जातेत्याह। चिरं बहुकालं प्राप्याभिलषितः विलासो
येन तादृशं अत एव तद्ध्यानेन तदात्मकता जातेति भावः। तत एतद्दर्शनांतरं जनितघर्मयुक्तं विशिनष्टि
गुरुहर्षेति। गुरुर्यो हर्षः सर्वातिशयी यो हर्षः तस्य वशं वदं तेन वा तथा वदनं यस्य। एतद्दर्शनांतरं तदा
नंदोल्लासेनोत्तरलितपरममाधुर्यमनोहरं जातामिति भावः। ततोऽनंगस्य विकासो यस्य तादृशं। ए
तेन पूर्वं अंतः सर्वभावनात्मके स्थितं तदेव तद्दर्शनेन बहिः प्रकटीभूतमित्यर्थः। ध्रुवः। तदेव वर्णयति।
पुनः कीदृशं। राधावदनेति। राधावदनविलोकनेन विकारितः विविधविकाराणां सात्विकादिभावानां ॥७॥
भंगो यस्मिन्। तत्र दृष्टांतः विधुमंडलस्य दर्शनेन तरलितास्तुंगास्तरंगा यस्मिन् तादृशं जलनिधिमिव
यथा समुद्रः रसेन पूर्णः अगाधश्च महागंभीरोपि विधुमंडलदर्शनेन तरलतरंगो भवति तथाऽयमपि तद्द
र्शनेनोच्छलितभावतरंगो जात इति भावः। एतेन विविधलावण्यविलासैकललिततरं तद्रूपं जातमिति त

विदूरं यथास्यात्तथाहारं परिरभ्य दूरादेव दर्शयित्वा एवमेव परिरंभागं कर्त्तव्यमिति तथा कृत्वा परिरंभो
रसिद्धतं ।अथवा। प्रथमलक्ष्मीलवक्रीतिदासद्वत्युक्तत्वात्प्रियाकंठस्थितं हारमादाय दूरादेवागत्य
विदग्धासखीनं प्रियायदत्तवती प्रियया प्रेषितोऽयमिति तदादूरादेवतं प्रियारूपमेव मत्वा परिरभ्य पश्चादु
रसिद्धतां अथाऽपराधक्षमानंतरं प्रसादज्ञापकं सेवकाय किंचिद्दीयते स पुनरुरसि तद्दधाति उरसितथे
त्यर्थः। कीदृशं हारं अमलतरा तारा मुक्ता यस्मिन् तादृशं एतेन प्रसादमुक्ताय स्नावजनितभयप्रियस्य निवृ
त्तं प्रियाया अपि विक्रीतत्वेन संभ्रमो निवारितः। कथमिव स्फुटतरं यथास्यात्तथा केन कंदर्पेण करं चितं यमुना
जनपुरमिव पूरपदेना छलद्रसतरंगवत्वं सूचितं ।पुनः कीदृशं ।श्यामलेति । श्यामलमतिशयेन श्यामं ।केवलं श्या
मलं रूक्षत्वेन मनोरमं न भवतीति मृदुलमुक्तं। तेन स्निग्धत्वं कोमलत्वं रसपुष्टत्वं स्पर्शसुखकारित्वं च द्योतितं।
तादृशं कलेवरमंडलं सर्वावयवसमूहो यस्य तादृशं पुनः कीदृशं अधिगतं कटितटे कृतं गौरं पीतं दुकूलं येन पी
तपदं विहाय गौरपदोपादानात् प्रियांगसादृश्येन तद्धृतमिति ज्ञापितं ।तत्र दृष्टांतः। नीलनलिनमिवेति ।कीदृशं
नूतन ।पीतपरागपटलभरेण वलयितं मंडलाकारेण रंजित हृदयं यस्य तादृशं एतेन समंततः स्रवन्मकरं
दरससंवलितनवविकसितनीलकमलस्य स्वरूपेण दृष्टांतकथनान्मूलतलगतपीतपरागस्य कूलेन सा
म्यकथनाच्चांतःस्थप्रियाया बहिःसंगेरितिः सूचिता। परागस्याधःपातित्वात्कमलस्योपरिस्थायित्वाच्च तथा

व्यंजितं भवति। अथवा परागस्यांतस्थितिर्भवति तस्य बहिःस्थितिकथनेन विपरीतत्वमुक्तं। तत्र च पुनर्भ्रू
॥७८॥ लस्थितिरुक्ता। तेन विपरीतरसे उत्संगस्थितिरचितो बंधविशेषो ज्ञापितः। एवं सति प्रिय एवं भावनया दु
कूलं दधतीति सांप्रतं साक्षात्कर्त्तव्यमिति निरूपितं पुनः कीदृशं। तरलेति। प्रियाय लोकेनेन तरलानां दृगंच
लानां यच्चलनं पुनः पुनस्तदंगनिरीक्षणार्थं यदग्रगमनं लोलतावानेन मनोहरं यद्वदनं तेन जनितः रतिरागो
राधायां येन तादृशं तदवलोकनेन तस्या अपि रति लोलतापन्नेति भावः। एतेन दृगंतचलनमपि रसभरोद्भूत
रत्यांदोलनसूचकमेव भवतीति ज्ञापितं। कमिव। शारदि शरत्काले स्फुटकमलोदरे खेलितं खंजनयुगं यत्र
तादृशं तडागमिव। तडागस्तु रसपूर्णं भवति तथा रूपं। तत्र विकसितकमलरूपं वदनं तत्र खंजनयुगं स
नेत्रद्वयमिति साम्यं निरूपितं। एतेन शारदितड्रागस्थकमलोदरस्थितखंजनदर्शनं शकुनरूपं भवतीत्य
त्रापि दृष्टज्ञापकत्वेन तथात्वं व्यंजितं। पुनः कीदृशं। वदनकमलेति। वदनकमलपरिशीलनाय तेन स
ह विलासाय मिलितो योरभिहितः सूर्यः तत्समा कुंडलशोभा यस्या अरुणप्रभोद्भासितमाणिक्यरचित
कुंडलशोभा तथा प्रसरति तथा स्वप्रियमिलनायागतो रविर्भवति। पुनः कीदृशं स्मितरुच्या रुचिरं यथा स्या
तथा समुल्लसितो योऽधरपल्लवस्तेन कृतः रतिलोभः राधायां येन तादृशं। एतेन तादृशं वदनं दृष्ट्वा अस्या अपि ॥७८॥
तितरलता जातेति ज्ञापितं। पुनः कीदृशं। शशिकिरणेति। शशिकरणैः छुरितं उदरं मध्यभागो यस्य तादृशं

योजलधरस्तद्वत्सुंदराः कुसुमयुक्ताभेघायथाशोभंतेतथा विलसंती त्युक्तं।अत्र चंद्रस्थानीयोमलयजतिल
कावल्लेयस्तद्देवाग्रे वर्णयति। पुनः कीदृशं।तिमिरोदि तेति।तिमिरमध्यादुदितोयो विधुमंडलस्तद्वन्निर्म
लः मलयजतिलकनिवेशोरचनापरिधिर्यस्य स्तादृशं। पूर्वर्द्धे विधुमंडलरूपतिलकस्य शशित्वेनसू
चनात्तद्रूपत्वे तिलकमध्ये मृगमदविंदुरपि वर्त्तत इतिव्यज्यते।एवंसतिशशि किरणछुरितजलधरसुंदरत्व
निरूपणेन प्रियंगचंद्रिकावलितसदानाभिमुखविपरीतरसाविष्टत्वं प्रियस्यसूचितं।अत्रापि विधुमंडलेमृग
मदविंदुनिरूपणेन प्रियोत्संगगतप्रियरूपत्वं तिलकस्यद्योतितं।पुनः कीदृशं। विपुलेति।एवंरसात्मक
भावेर्जनितायायोविपुलः पुलकभरस्तेदंतुरितं सात्त्विकभावेनलब्धपांकुरैर्व्याप्तं।अतएवकदंबकलिकला
भिस्तत्समयेस्फुरिताभिरित्यर्थः।ताभिः कृतात्मधीरंतत्करणोत्कंठयोप्ररलीकृतं पुनः कीदृशं।मणिगण
ति।मणिगणास्तत्तद्भावात्मिकास्तेषांकिरणसमूहेन समुज्वलानिसम्यगुज्वलारसात्मकभावरूपाणिवाया
निभूषणानितैः सुभगं परमं सौंदर्यरूपंशरीरंयस्य तादृशं।एतेनसाक्षादुद्बुद्धरसात्मकत्वं निरूपितं।एव
स्वरूपपूर्णरसंनिनिरूप्य गीतमुपसंहरति।श्रीजयदेवेति।हेश्रातारः श्रीजयदेवस्ययद्भणितंतस्ययोविभ
वस्तेन द्विगुणीकृतः भूषणभारोयस्मिन् एवंयथातथाप्रणमत।पूर्वभक्तानांत्वयापभुक्तस्रग्गंधेत्याद्युक्त
भूषणभूषितत्वं बहिर्भवेत्यधुना एतद्विभवेनद्विगुणीकृतभूषणभारत्वोक्त्या एतद्वर्णनांतरुद्भलद्रसात्म

॥८६॥ कभावरूपभूषणभूषितत्वंचोक्तमितिभावः। तेनतादृशभावजनितदैन्येनैवनमनमपिसूचितं। पुनः कीदृ
शोसुचिरं अलंतं चिरकालसंचितसुकृतोदयसाररूपंफलरूपं। अथवा। सखीजनान्प्रत्येवोक्तिसखेः
। तथाहि। हेसख्यैः तादृशंहरिं प्रियादुःखहरणेनास्मत्तत्निवारकंप्रणमत। तत्रापिहृदि विनिधायांतेन
बाह्याभ्यंतरं नमनयुक्तं। तत्रहेतुः सुचिरं यथास्यात्तथासुकृतोदयसाररूपं। पुनः कीदृशं। श्रीजयति।
श्रियाजयेनच सर्वोत्कर्षेणकामजयेनवादिव्यति क्रीडतितादृशं यद्भूषितं राधाकृतगीतोक्तं तस्यविभवे
न द्विगुणीकृताभूषणभारोयस्यतादृशं पूर्वं रसात्मकंभूषणादिभूषितएव पश्चादेतद्वर्णनात्यंतरस
विभावेन द्विगुणशोभयाशोभमानोजातइतिभावः। यथा व्यरोचताधिकमिति। किंच। प्रणमतेतिकथने
न सखीनांबहिर्गमनसंकेतोपिसूचित। अतएव हृदि विनिधायेत्युक्तंभावनयेवावलोकनीयमितिभावः।
अतःपरंसखीजनेकुंजाद्बहिः प्रचलतुमुद्यतेसतितताद्यज्जातंतन्निरूपयति। अतिक्रम्येति। तदापुनर
नुरोधाभावेन प्रियतमस्यसमालोकसमये अक्ष्णोस्तवलोकनानंदभरेणहर्षाश्रुनिकरःराधायापपातस्वे
दांभः प्रसरद्रवः यथा प्रियदर्शनमात्रेणसात्विकभावजन्यःस्वेदांभःप्रसरःपपात। तथाक्ष्णोरसइतिस ॥८६॥
होपमा। कथंभूपयोरक्ष्णोः अपांगंनेत्रप्रांतमतिक्रम्य तरलतरा तारायस्मिन्नेवंपतितयोः प्रियइ
त्यर्थः सखीजनानुरोधेतावत्पर्यंतंतथापातेतयोरुत्कंठेवस्थितादिदानीं तदभावात्सत्वरं तथापतित

योः।यथापंजरपतितखंजरीटयुगलंतदनुरोधान्निर्गतंचेत्तदासत्वामुद्रीयस्वाभीष्टदेशंप्राप्नोति
तथेत्यर्थः।किंच।पतितपदात्तस्याततःपुनरुत्थापनाशक्तिःसूचिता।तिनात्रैवमग्नेतिभावः।कथक्षि
तः।किंच।यद्यपिप्रियालोकजनितसात्विकभावेनस्वेदांबुप्रसरोराधायायथातथालोचनयोरानंदाश्रु
करोपिप्रमोदेनैवहेतुरुत्प्रेक्षतइत्याह।श्रवणपथपर्यंतगमनप्रयासेनेवेति।यथाराधायाअभिसार
जनितश्रमेणस्वेदांबुप्रसरस्तथालोचनयोःश्रवणपथपर्यंतगमनप्रयासेनेवस्वेदांबुरूपोहर्षाश्रुनि
करःपपातेतिभावः।अथवा।श्रवणपथपर्यंतगमनप्रयासेनेवेतिपतितयोरित्यत्रयोज्यं।एतेनातिदूरगम
नेश्रांतत्वेनपतनंसंभवतीतितथोक्तं।अनेनाकर्णांतदृष्टिर्निरूपिता।एवमालोकनानंतरमग्रिमकृतिं
निरूपयति।भजंत्यादिति।ततस्तत्यांतसेवनक्षणएवबहिर्गतव्यमित्यवधावनसहितःयआलीपरि
जनस्तस्मिन्कृताकपटकंडूतिर्यस्मिंस्तेवंपिहितमाच्छिन्नंस्मितंयथास्यात्तथागेहाद्बहिर्यातिसतिकंडूति
मिषेणपूर्वंरचितरोषावेशादशास्मरणजनितस्मितंआच्छाद्ययथासानजानातितथागोपनंकृत्वाबहि
र्निर्गतिसतिस्मरशरैःसमाकूतंविविधभावांदोलितंअतएवसुभगंचपरमसौंदर्यमनोहरंयथास्यात्तथा
स्यंपश्यंत्याः।अथवा।प्रियास्यस्यैवविशेषणं।तादृशंतत्पश्यंत्याःमृगदृशंलज्जाप्यतिदूरंव्यगमत्।
पलायितवतीत्यर्थः।तत्रहेतुःसलज्जेति।कामेनजितत्वाल्लज्जितासतीस्थातुमसमर्थाजातेति

भावः। अपि शब्देन यथा आलीजनो बहिर्निर्गतस्तथा लज्जापीति ज्ञापितं। इवेति पाठे आलीपरिजन
॥८०॥ द्रवसापि व्यगमदिति संबंधः। अथवा। इवत्येवार्थ। व्यगमदेवेत्यर्थः। तदा हित्वालीपरिजनेनेति योजना
। एवं रसभराक्रांतां दृष्ट्वा प्रियः परिरंभणं कृतवानिति कुंजांतरेण कुचित्सखी दृष्ट्वा पठितवतीत्याह। ज
यश्री विन्यस्तैरिति। प्रकीर्णो विस्तृतः स्रग्विंदुर्यत्र तादृशो मुरजितः रसप्रतिबंधक शत्रुजयकर्तुः श्री
कृष्णस्य भुजदंडो जयति। सर्वोत्कर्षेण विराजते। दंडपदेन यः शत्रु बद्धाधां करोति तं दंडयत्येवेति ज्ञा
पितं। तेन मुरजित्पदेन कामस्यैव जेतुरित्युक्तं। ननु भुजदंडे स्रक्संबंधासंभवात्प्रकीर्णास्रग्विंदुत्वं
न संभवतीति चेत्तत्राह। विशेषणेन। कीदृशस्य मुरजितः भुजाभ्यां आसमंतात्पीडायितैरित्यर्थः। क्रीड
येव हतः कुवलयापीडाख्यः करी येन तादृशस्य एतेन तन्मारणे तत्र हेतुत्वात् स्रक्संबंधो जात इति ध्व
न्या तत्र दृष्टांतेन विनिनष्टि। जयश्रीति। जयश्रिया विन्यस्तैः मंदारकुसुमैर्महित इव पूजित इव। इ
मा अस्रग्विंदवो न भवंति किंतु जयश्रीया मंदारकुसुमैरेव पूजित इति। किंच। द्विपरजजनितमुदाञ्जनं
देनहेतुना जयश्रियेव स्वयं सिंदूरेण तत्कुंभस्थसिंदूरेण मुद्रितं इव मुद्रां प्रापितं इव जय चिन्हस्य मुद्रे ॥८०॥
व कृतेति भावः अथवा। अत्र भंग्यंतरेण रसात्मकधर्मा ज्ञापयति। मुरजितः कामजेतुः परिरंभण
न कुचकुवलयापीडकरिणः भुज्याभ्यामापीडनं मर्दनमुक्तं तेन गाढालिंगेन तथात्वं ज्ञापितं। तत्र

चनखक्षतदानजनितारुणचिन्हानीभस्तन्यूपत्वंसूचितं।तत्रोत्प्रेक्षते।जयश्रियाकामजनितयाश्रियात्त
थेत्यर्थः।पुनःकुचकुंभकुंकुमादिसंबंधात्सिंदूरमुद्रितत्वं प्रियययैवकृतंस्वकीयसंपादनायेतिभावः।एतादृ
शोभुजदंडोजयतीतिभाव।राधापरिरंभणादिप्रस्तावनाकृता॥ ॥इतिश्रीगीतगोविंदटीकायांगूढार्थदीपिकायां
सानंदगोविंदोनामैकादशःसर्गः॥ ॥अत्रसानंदगोविंदत्वंप्रियामिलनेनस्फुटमेवागम्यते।अथसखीगमना
नंतरंयज्जातंतद्वर्णयति।गतवतीति।सखीवृंदेगतवतिसतितंतोमंदायत्रपाभरस्तेननिर्भरःस्मरवशआ
कूतंविविधभावसंवलितंयथास्यात्तथास्फीतंयत्स्मितंतेनस्नापितोधरोयस्यास्तादृशी।पुनःकीदृशींसर
सम्मनसंरतिसादरचित्तांअतएवमुहुर्मुहुर्नवपल्लवानांप्रसवानांशयनेनिक्षिप्ताक्षींअनेनस्वस्यरतिसमिह
ज्ञापिता।तादृशींप्रियांदृष्ट्वाहृष्टःहरिःउवाचउक्तवान।तदेवगीतेनानुवदतिविभासरागएकतालेक्षणम
धुनानारायणमनुगतमनुसरराधिके।हेराधिकेमदाराधनसाधिकेएतावत्पर्यंतंमयात्वदाराधनायत्नःकृ
तंतस्यफलरूपाफलस्यसाधिकाचत्वमिदानींप्रकटेतिसंबोधनं।अतएवाधुनाक्षणमिदानींक्षणमात्रेणा
नुगतांलक्ष्मीकृत्यगतंत्वत्समीपेप्राप्तं।पूर्वंतुनारायणंत्वदेकध्यानैकपरंबहिरनुसंधानरहितं।तादृशम
नुसर।यथानारायणःक्षीराब्धौशेतेतथामयापिरससमुद्रेशयितं।बहिःसंवेदनाववत्वात्।अधुनात्व
दवलोकनक्षणमात्रउद्बुद्धइतिअनुगतंत्वदनुसरणेप्राप्तंमामनुसर।यथानारायणशयनानंतरंप्रबोधि

जाते सर्वोपि तं पुनरर्चितं तथेत्यर्थः। यथातिविमलदुग्धाब्धिसलिले नारायणः शेते तथास्मिंस्तले विकसितकुसु
॥८१॥ मनिकरप्रभोज्ज्वलतरे विशदशारदकौमुदीप्रसरावभासमानपरमरमणीयनिलये अधुना नारायणं लीलात्मक
शयनेनोपस्थितं क्षणं सुखरूपं अनुसर। तत्रापि लक्ष्म्यनुसरति। अत्रत्ययोग्यस्तल्पमेवेति भावः। किंच। तत्र पुन
र्नारायणः। नारं जलसमूहस्तत्रायनं यस्य तादृशः इतीदानीमत्र नारायण उद्बुद्धरसायनः नागबंधप्रकारेण शि
तद्इति शेषशयनमपि व्यंजितं। तदेवानुसरणं विशदयति। किसलयेति हे कामिनि किशलयशयनतले चरण
नलिनविनिवेशं कुरु। तत्र हेतुं वदति। इदमंगुल्या निर्दिष्टं सुवेषं सुंदरो विशेषो रचनारूपो वा यस्य तादृशं किस
लयशयनं तव पदपल्लवात् वैरसंबंधिपराभवमनुभवति। पल्लवः स्वसौंदर्येण त्वच्चरणेन सह स्पर्द्धत इति
त्वच्चरणधारणेनाय पराभवो भवतु। त्वच्चरणसौंदर्येणापहतगर्वो भवत्वित्यर्थः। अथवा। क्रीडायां मर्दने
न तथास्त्विति। अथवा सुवेषमिति पराभवविशेषणं। तेन तत्पदरचितपराभवोपि सुवेषणीयेति सूचितं। ए
तेन त्वच्चरणसंबंधेन किशलयानां सफलजन्म वत्स्यं भविष्यतीति व्यंजितं। अन्यच्च। तवपदपल्लवेन कृता
वैरीयः कामस्तस्य पराभवमप्यनुभवतु। शयनस्य रंगभूमित्वात्तत्रैव कामपराभवस्य कर्त्तव्यत्वात्तवपद ॥८१॥
धारणेन तमप्यनुभवतु इत्युचितमिति भावः। अन्यदपि प्रार्थयति। करकमलेनेति। अहं स्वकरकमलेन तव चर
णं करोमि। श्रमनिवारणार्थं। प्रयोजनकथनपूर्वकधारणकथनेन बहुप्रयोजनगर्भितत्वात्तदूराभिप्रायकं धा

रणमितिव्यंजितं। ननु पदधारणं सखीनां धर्मस्तत्राह। मदर्थं विदूरमार्गगमितासि मयैव प्रापितासीति भा
वः। अतोऽहमेव चरणसंवाहनादिकर्म करोमीति प्रार्थ्यते। किंच। शयनोपरिस्थितत्वात्क्षणं मामुपकुरु। त्वं
शयनं कुरु मया पादसंवाहनं कर्तव्यमितिभावः। कीदृशं मां। अनुगतिशूरं त्वत्पदानुचरणे शूरमतिसमर्थं
तत्र दृष्टांतः नूपुरमिव। नूपुरो यथा त्वत्पदानुगमनेन शूरस्तथाहमपीति साम्यं। अतोनुचरधर्मकरणे आज्ञा
पय सिंचेदुपकारमेव करोषि। आज्ञादानेन प्रसादोपि त्वया ज्ञातो भवेदित्यपि तथा। अथवा। अभिसारेस
मुत्तारितं नूपुरं सख्या शयनोपरि इदानीं स्थापितं दृष्ट्वा वदति। नूपुरमुपकुरु मामिवेति दृष्टांतः यथा पदक
मलसंवाहनाज्ञा मय्युपकारः कृतस्तथा नूपुरमपि पादानुगतिकरणे ज्ञापते त्यनेन तत्करणे मामेव ज्ञाप
येति व्यंजितं। अन्यदपि प्रार्थयति। वदनसुधानिधिगलितमिति। ईषल्लज्जया स्थितां प्रत्याह। अनुकूलंव
चनं रचय। इदानीं लज्जाकरणं प्रतिकूलमेव तत्त्यागेन रसधारास्ताविवचनं कर्तव्यमितिभावः। किमिव
। वदनसुधानिधिगलितममृतमिव। तादृशवचनश्रवणानंतरं उरसि यत् दुकूलं तदहमेवापनयामि यतः
पयोधरयोरसधरयोरवरोधकं। कमिव। विरहमिव। यथेदानीं विरहो मया निवर्तितस्तथेदमपि दूरीकर्त
व्यमितिभावः। अपनयामीति वर्त्तमानप्रयोगेन तत्क्षणमेव तत्कृतमित्यपि व्यंजितं। दुकूलविस्रंसेन पुल
कितमवलोक्य प्रार्थयति। प्रियेति। प्रियपरिरंभरभसेन वलितमिव तत्परिरंभं कर्तुं अग्रे वलितमिव पु

लं कितं कुचकलशं मदुरसि विनिवेशय। तेन मनसिजस्तापं च शोषय निवृत्तं कुरु। कथंभूतं कुचकलशं। अन्य
॥८२॥ दुरापं। इतरसाधनैर्दुःप्राप्यं किंतु त्वत्करुणाकटाक्षेणैव प्राप्यमित्यर्थः। अतएव त्वं विनिवेशयेत्युक्तम् त्वदं करोमीत्युक्तं।
अथवा। तादृशं कुचकलशं दृष्ट्वा तरुणानामपि पुंभावो भवति तथापि तेदुःप्राप्यमेव भवति तथोक्तं। एतावत्कृत्यनंतरमभ्यं
तः संवेदनरहिता बहिस्तथा स्वभावस्फूर्त्ति न जातेति जीवनं दानं प्रार्थयति। अधरेति। हे भामिनि भामनीति संबोधने
न त्वत्कोपेनैव मम जीवनस्य त्वद्भावात्मकत्वं जातमिति सूचितं। अतोऽधरसुधारसमुपनय देहि। तद्दानेन मां जीवय
स्वभावो द्रोधसहितं कुरु। यथाऽमृतेन मृतं जीवयेत्तथा समापीति ज्ञापनाय मृतमिवेत्युक्तं। तत्र हेतुः। दासमिति। स्वकी
य चरणसेवकमिति। मादृग्रूपदासयोग्यं दास्यं कारयेति भावः। तथात्वमेव स्पष्टयति। त्वयीति। त्वयि विशेषेण निहि
तं स्थापितं मनो येन। मन इत्युपलक्षणं विरहे त्वय्येव मनआदि सकलेंद्रियादि निलयं प्राप्तानि तान्यद्यापि न स्वस्वभा
वं प्राप्तानीति निरूपितं। शिष्टं वपुः तत्तु विरहानलेन दग्धमिति तथा विशेषणमुक्तं। अतएव विलासं बहिर्विलास
स्फूर्त्यभावसहितं। अतोऽमृतदानेन जीवयेति प्रार्थना। अत्र यदेव प्रार्थ्यते तदेव दीयत इति तथाकृतिरपि भवती
ति ज्ञेयं। एवममृतदानेनोद्बुद्धस्वरसात्मकः सन् विलासारंभे किंचित्प्रार्थयति। शशिमुखीति। तादृशेपि समये किंचि ॥८२॥
ल्लज्जां कितं मुखं वर्त्तत इति शशिमुखीति संबोधनं। अस्मिन्समये लज्जानोचिता किंतु तां विहाय मणिरशना गुणं
अनुगुणः कंठनिनादः मणितरूपाय स्मिन्नेवं यथा तथा मुखरय। मणितसहितमपि क्वणितयुक्तं कुर्विति भावः

अनुगुणकथनेनद्वयोरप्यैकरूपतानिरूपिता। तत्करणेआवश्यकत्वमाह। श्रुतियुगलइति। पिकरुतेनवि
कलेपूर्वंत्वद्विरहेतस्यकटुरवणविचेष्टश्रुतियुगलरुचिरज्ञातमवसादकंत्वरूपंदुःखंशमय। अनेनकूजित
नसनिवर्त्तिष्यतइतितथाप्रार्थ्यते। एतेनतस्याप्यारंभोजातइतिज्ञापितं। तदापरमानंदसमुद्रमग्नामीतितर
लिनयनांप्रवदति। मामतीति। इदानींयत्तवनयनंमुद्रितंभवतितन्मयाज्ञातं। तदेवाह। अतिविपलरुषा
सि। निःकारणंत्वनोभयोरपिदुःखजनकत्वाद्विफलएवक्रोधः। तादृश्यारुषाविकलीकृतंमामधुनाअवलो
कयितुंलज्जितमिव। एतच्छुज्जाजनितमीलनाद्विरस। लज्जांविहायविविधरसादोलितकटाक्षतरंगे
रवलोकयेतिभावः। अथचारतिखेदंरतौखेदंमयाव्यर्थमेवपूर्वमेतावत्कृतमितिखेदं। विसृज। अप
राधस्तममैवतवकोदोषइति। अथवा। इतिखेदंप्रथमसंगेयथाभवतितादृशंविसृजनयननिमीलन
मपितेनैवजातमित्यपिज्ञापितंभवति। एवंरतिप्रारंभेजातेगीतमुपसंहरति। श्रीजयदेवेति। इदंश्रीजय
देवभणितंकीदृशं। अनुपदं। पदंपदंलक्षीकृत्यनिगदितःमधुरिपोःकालेजयकारिणःमोदोयत्रयेनवा
तादृशंप्रतिपदंतद्भावसरसःहृदयेषुमनारमेयोरतिरसभावःतस्यविनोदंकौतुकमुखंजनयतु। एतद्भावेन
मनसितद्रसानुभवंकरोत्वित्यर्थः सखीजनानांपरस्परंतद्वार्त्तयातथाभवतीतितथोक्तं। अतःपरंयादृशः
सुरतारंभःप्रकटीबभूवतादृशमाह। प्रत्यहइति। तयोःसःसुरतारंभउद्भूतोबभूव। सइतिप्रसिद्धःरसशास्त्रे

धित्यर्थः। अथवा स अनिर्वचनीय इत्यर्थः। कीदृशं प्रियं भावुक उभयोस्तादृश एव प्रियत्वानुभावको जा
॥८३॥ तइति भावः। तमेव कथयति। यत्रारंभे निबिडाश्लेषकृते सात्विकभावादुत्पन्नः पुलकांकुरस्तेन प्रत्यूहोऽ
भूत् तावानप्यंतरायः सेढुमशक्योऽभूदित्यर्थः। क्रीडय क्रीडायां वाद्यदा कृतं विलोकितं विविधभाव
संवलितं विलोकनं तस्मिन्निमिषेण यत्र विघ्नोऽभून्निमेषमात्रमपि तत्सहनमशक्यमभूदिति। अधर
सुधापाने च कथानर्मभिः कथाभिः रसोपयोगिभिः परिहासोक्तिभिः विघ्नोऽभूत्। यद्यपि सा कथा बोधा
दिकभावोद्बोधिका अनुकूला तथापि तत्पानेऽतरायकारिणीति प्रतिकूला जातेति भावः। मन्मथकला
युद्धे विविधबंधकलाप्रकारेण युद्धकरणे आनंदाधिगमेन प्रत्यूहोऽकृत। तादृशानंदप्राप्तौ सर्वेंद्रिया
णां तत्रैव लीनत्वाद्बहिरनुसंधानाभावेन तत्तत्कलाकौशलप्राकट्ये तथेति भावः। यद्यप्येते धर्मा अपि
रसात्मकाः सुखाभिव्यंजका एव तथापि तत्समये तत्तत्कृतेरेव प्राधान्यात्तथा जात इति भावः। अन्य
दपि आश्चर्यं निरूपयति। दोर्भ्यामिति। एवंभूतापि कांतः कामपि तृप्तिमनिर्वचनीयां संतोषपूर्ति
आप तदहो आश्चर्यं एवंभूतस्य लोके खेदो दृश्यते अस्य तु संतोष इति तथा। नन्वेवमाश्चर्यं कथं भवती ॥८३॥
ति तत्राह। कामस्येति। यतः कामस्य वामा गतिः लोककृतबाहुबंधनादि विपरीता गतिरित्यर्थः। लोके सा
कृतिर्दुःखदायिनी। कामसमरे सैव सुखदायिनीति विपरीतत्वं गतो। कामजयानंतरं तृप्तिं रुचितैव।

अथवा।यत्तादृशोपित्रिपिमापन्नःकामस्यवामागतिरहो आश्चर्यं।अथवा।अग्रेप्येवंकामयुद्धेकांतए
वताडितःमोहमपिप्राप्तःतथापराभवःकामस्यैवजातइत्याश्चर्यं।अग्रेपुनःकामस्यप्रतिकूलागतिः
समरोपक्रमरूपाभवतिंतदप्याश्चर्यं।एकावारंजितस्यपुनस्तदुद्यमेआश्चर्यं।एवंसतिकामपित्रिपि
प्राप्तेत्येकमाश्चर्यं।पुनरग्रेकामस्यवामागतिरिति द्वितीयमाश्चर्यं।इतिपदसंबंधोज्ञेयः।मुहुर्मुहुःपराजि
तोपिस्वप्रतिकूलतांनत्यजतीत्याश्चर्यं।किंच।केवलंताडनमात्रमेवनकृतं किंत्वन्यपितदाह।दोर्भ्यामि
ति।दोर्भ्यांसंयमितःदृढंबद्धःततःपयोधरभरेणगाढंपीडितःमर्दितइत्यर्थः।ततःपाणिजैराविद्धःपुनःक्षता
धरपुटःपश्चाच्छ्रोणीतटेनाहतःताडितःएतेनविपरीतरसोनिरूपितःपुनर्हस्तेनकचेआनमितःकचंगृही
त्वागाढोपमर्दैःचुंबनादौवातथाभवतीतितथोक्तं।एवंकृतःपुनरधररसस्यंदनसंमोहितःतदानंदरसम
ग्नइत्यर्थः।एवंद्वंद्वयुद्धेप्रवृत्तस्यकांतजयायत्नंकृतवतीत्याह।मारांकइति।मारएवांकोयस्यःकेचन
योद्धारोह्यंकधारिणःस्वघ्नतमंकेचिद्रूअन्यत्रपश्यंतिचेत्।तदाभिमानेनतेनसहयुद्धंकुर्वंतिजयपरा
जयौतुदैवाधीनौ।तथारतियुद्धंमारांकंभवति।यस्यैवमारःप्रबलःसएवद्वितीयेनसहयुद्धंकुर्यात्।एवं
सतितादृशोरतिकेलिकुलरणारंभयथाअनेनवाद्यादिघोषकोलाहलसमुदायःसंकुलमुच्यतेतथाकं

कणनूपुरकिंकिणीदामादिक्वणितसंयुक्तत्वमत्रापिसूचितं। तारंभ्रोतस्मिन् तयामारांकधारिण्या
॥८४॥ प्रिययाकांतजयायतस्मिन्नपितंदकंदृष्ट्वातज्जयंकर्तुमुचिदनिर्वचनीयंसाहसप्रायंसाहसिकत्वंसंभ्रम
रत्यादरेणतदुपरिकांतोपरिभ्रारंभि। इदंतुमहत्साहसंकृतं। परंत्वेविचार्यतत्कृतंतदेवाह। यतोनिःसं
दाजघनस्थलीजातादोर्वल्लिःशिथिलि। वक्षस्त्कंपितंअक्षिचमीलितमिति। जितस्यैवंभवति। पूर्वयुद्ध
रंभमारांकाभिमानात्। जंघालुत्वाच्चवेगवतीस्थितेतिजघनस्थलीतथोक्ता। दोर्वल्लिरपिगाढाश्लेषबंधा
दिषुउद्दंडा। वक्षोपिश्रमाभावात् स्थिरं अक्षिचोत्तरलंकटाक्षबाणप्रहारेषुसादरंस्थितमिदानींसर्वत्रैत
दुर्मनिवृत्त्याः। कंठोक्तधर्मवत्वंजातमितिपौरुषरसःस्त्रीणांकुतःसीध्यतीत्युक्तं। तासांस्तंभनसामर्थ्या
भावात्तथात्वंकथंसिध्येदित्यर्थः। अतएवतदारंभोपिमहत्साहसमित्युक्तंएतेनकं। तज्जयःसूचितः। अथ
वा। एवंयःस्त्रीणांपौरुषरसःसिध्यति। अनेकसुकृतसाध्यत्वात्। तदभावेकुतोहेतोःसिद्धिंप्राप्नोतित्य
र्थः। अनेकसुकृतसमूहैरेवतथेतिभावः। यद्यप्येवंकांतजयोनिरूपितस्तथापिसाएववक्रेजातइत्या
श्चर्यंनिरूपयति। तस्याइति। रतिरणारंभपूर्वमस्यांकामशरानिखातायतस्तप्रहारजनितघर्मचिन्हा ॥८४॥
निलक्ष्यंते। तान्येवस्फुटयति। तस्याउरःपाटलपुष्पवत्येपाणिजातेरंकितं। तस्यादृशोनिद्रया। कषा

ये अलसघर्मसहिते प्रहारानंतरं घूर्णितदृशा सूचिता। अधरशोणिमा चनिनिर्धौतः अनेन मुखदृशांतरसो
ज्ञापितः। विलुलिताः स्रस्ताः स्रजो येभ्यस्तादृशाः मूर्द्धजा जाताः एतेनानवधानत्वं प्रदर्शितं च पुनः कांची
दामः दूषश्लथमंचलं यस्य तादृशं जातमिति लज्जाद्यननुसंधानेन मोहावस्था निरूपिता। एवं तद्रसपर
मानंदसमुद्रमग्ना जातेति निरूपितं। एभिः पंचभिः कामशरैः कीदृशैः प्रातः पत्युर्दृशा निखातैः प्रातः प्रिय
या एतानि पंचापि दर्शनमात्रेण तत्रैव संलग्नानीति भावः। तादृशैस्तदद्भुतमभूत् यत्पत्युर्मनः कीलितं। निखा
न ताः दृशोः स्थाने एवत्र निखाता इति पुनर्निखाताः दृशोः कीलितं मन इति द्वितीयः। नहि निखातस्थलादन्यत् की
लितं भवति। इदानीं सेनायाः पलायने सेनापतिश्च संमुखे तिष्ठति तदा शूरस्य प्रीतिमेवोत्पादयति। तदा
ह। व्यालोल इति। युद्धे जितस्य तथा भवतीति कामयुद्धजितायाः स्वरूपं वर्णयति। केशपाशो व्यालोलः विमु
क्तवेणिरित्यर्थः। एतेन कनकगौरकांतिकमनीयतरांगेषु वितत कचनिचयशोभातिशय उक्तः। अलकैस्त
रलितं। पूर्वस्थाने स्थिता एव वक्रा स्थिताः इदानीं विपर्यस्ता इति तरलत्वं। कपोलौ खेदलोलौ। श्रमेण तथा
भूतौ बिंबाधरश्रीरपि दष्टा दंतक्षतेन तथाकृतानेन सभ्रमेणेति सूचितं। युद्धे तथा भवतीति तथा कुचकलश
रुचा हारयष्टिर्हारिता। त्रुटिता सती पतितेत्यर्थः। युद्धे जयानंतरं लुंठिता। जातेवेति ज्ञापनाय हारितेत्युक्तं। कां
ची च कांचिदाशांगतान ज्ञायते कुत्र गतेति ज्ञापनाय कांचिदित्युक्तं। युद्धपराजितानामेवमेवावस्था भव

तीति स्वयं सेनापतिः स्तनजघनपदं पाणिना आछाद्य पिधाय सत्रपं सलज्जं यथा स्यात्तथा मां पश्यतीर्त्तां
ते तादृश्या लज्जा भवतीति शांतरसो निरूपितः॥ तथापि विलुलितायास्त्रकृतां धरती लिरतिरणकीर्तिधा
॥८५॥ रणं द्योतितं। तादृशीमां धिनोति। प्रीणयति समस्तभूषणावसनरहितास्त्रक्षात्रेणापि परमशोभया प्रीणय
त्येवेति रसपरवशत्वं तत्सौंदर्याधिक्यं च निरूपितं। यथा पराजितो स्ववंशपतितोपि संग्रामे लब्धोयोनुभावा
च्छूस्य प्रीतिमेवोत्पादयति तथेयमपीति भावः। किंच। पूर्वयुद्धसंमुखस्य पश्चाज्जितस्य प्रतिपक्षविलोकने
लज्जा भवतीसत्रमित्युक्तं। तादृशो लोकेनजेतुं प्रीतिरुचितैव सर्वमवदातं। एतस्मिन्नंतरे कुंजांतरेण काचि
त्सखी पठितवतीत्याह। ईषदिति। एतादृशाकुरंगीदृशा आननं धन्यो धयतीति संबंधः। कीदृशो धन्यः उद्यामः
उत्तंग उच्चभागः चुचकरूपो ययोस्तादृशौ पयोधरौ तदुपरि परि ष्वंगी आश्लेषवान। एतेनाश्लेषं कुर्वन्नेवा
ननं धयतीति सूचितं। आननस्यैव पानकथनेनाधरसुधापानकपोलनयनचुंबनरसामृतपानं वर्णि
तं। प्रथमं तत्सामयिकाननस्वरूपमाह। ईषन्मीलितदृष्टि। आनंदाविर्भविनतथात्वं। मुग्धं मनोहरं यथा
स्यात्तथा विलसंती या सीत्कारधारा तद्वशाद्व्यक्ता आकुला केलिर्यस्य गाढरदनक्षतादिकरणे तथा भव ॥८५॥
तीति तथोक्तं। अंगो पुनः काकुक्ति प्रियवाक्यं। विनयसहितप्रीत्युत्पादकं वचनं तेन विकसंतो ये दंतांशा
वः तैर्धौतः अधरो यस्य तादृशा मे तेन रसभरेण स्मितमपि व्यंजितं। किंच। एवमानन शोभामुक्ता स्वरू

पावस्थामाह। हर्षेति। हर्षोत्कर्षेणानंदोद्रेकेण विमुक्तारसयनरवशालया शिथिलाकृता निःसहतदंतरायं सो
ढुमशक्तानतुर्यस्यास्तादृश्याः एतेनलदानंदसमुद्रेमग्नाजातेतिसूचितं। क्वचित्प्रथमांतंपदंतदाकर्तृविशे
षणंज्ञेयं। एवमभिमरसप्रस्तावनाकृता। अतःपरंरतांतेतादृशीपूर्वोक्ताराधापरमप्रीतंवशीकृतस्वाधी
नीभूतंतंदृष्ट्वावदतीतिनिरूपयति। अथेति। अथेततिपूर्वरतिनोभिलाषक्रमेणसुरतांतेनितांतखिन्नांगी अ
लसांगी। इदानींकांतजयोजातइति। अतःपरंमयायंजेतव्यइत्पुनरपियुद्धायसज्जीकरणार्थंसादरं
यथास्यात्तथासादरंगोविंदंवाआनंदेनवाजगादेदंवक्ष्यमाणमुक्तवती। कीदृशंसहसासुप्रीतं। तत्क्षणे
सुतरांप्रीतं। अथवा। सहसाइषत्स्मितयुक्त। क्वचित्श्लोकांतरपाठः। अथकांतंरतिश्रांतमपिमंडनवां
छयानिजगादगताबाधास्वाधीनभर्तृकेति। अर्थःस्पष्टएव। तदेवरामकरीरागेणगीयतेरूपकतालं
निजगादसायदुनंदनेक्रीडतिहृदयानंदनइति। क्री०हृदयस्यानंदकारकइतियथैवाभिलाषस्तथैवकरो
तीतिज्ञापितं। तादृशेयदुनंदनेक्रीडतिसतियदुवंशोद्भवामहांतःराजानःसकलकलाभिज्ञास्तत्रापियदु
मुख्यस्तन्नंदनत्वकथनेनतादृङ्महत्वंनिरूपितं। तादृशोपिममहृदयवर्तीतिहृदयानंदनत्वंयुक्तमेवे
तिभावः। तादृशोक्रीडांकुर्वतिसतिसाराधानिजगाद। तदेवाह। कुरुइति। हेयदुनंदनभर्तृनामनग्राह्यमि

तितथासंबोधनं।एतेनंमहाराजकुलोत्पन्नत्वेनतत्रापिनंदनत्वेनानंदकारकत्वाद्रचनायांसकलांचातु
॥८६॥ र्यंचज्ञापितं।अत्रपयोधरे अत्रेतिअंगुल्यादर्शयति।तेनपूर्वसामयिककरकमलसंमर्दगाढाश्लेषादि
तिश्रमजलादिनामकरीरचनायांश्लिष्टत्वंसूचितं।तादृशेपयोधरेमृगमदस्यपत्रकंमृगमदेनवापत्र
कंकुरु।चंदनशिशिरतरेणकरेणेत्यर्थः।चंदनशिशिरतरेणेतिविशेषणेनपूर्वस्यश्लेषिकामाग्निजनित
स्तापःकरेस्थितइदानींतदभावोज्ञापितः।अथवा।स्वतापनिवर्त्तकत्वात्तथात्वमुक्तंमनोभवस्ययोमंगल
कलशःअथपुनः।यात्रायांतच्छकुनार्थंस्थापितःपूर्णकुंभस्तत्सहोदरतत्सदृशे।एतेनपुनःयुद्धार्थंकाम
स्ययात्राज्ञापितेतितत्रशकुनार्थंरसपूर्णमंगलकलशाविवस्थापितौ।तत्रपुनःपल्लवधारणमिवमृगपदप
त्रकंकुर्वितिज्ञापितं।अतएवपूर्णकुंभस्येवशकुनत्वमितिज्ञापयज्ञायपयोधरपदं।किंचहेप्रियएवंकरणेन
ममतत्स्पर्शादिनाप्रीत्युत्पादकेअलिकुलेतिममलोचनेत्वदधरेणकृतंयच्चुंबनं।तेनकंबितंविततीकृतं
यत्कज्जलंतदुज्वलयप्रोक्षनादिनाशृंगाररूपंकुरुतांतत्तादृशमेवशोभाकरंभवति।रतिरणारंभेतु ॥८६॥
रेखाकारेणरचितंमेवभूषितंक्रियतइतिपुनस्तथाकरणत्वमुक्तं।कादृशंकज्जलंअलिकुलस्ययद्गंज
नंतस्यसंजनकं।यथाकमलेभ्रमरास्तिष्टंतितादृक्शोभयातच्छोभांतिरस्करोति।कथंभूतेलोचनेरति

नायकस्य सायकं मोचयंतीति तादृशाः कामस्य बाणाः पुष्पाणि तानि वृथा जातानि एतल्लोचनेनैव तत्का
र्यं भवतीति भावः। एवं कथनेन सौंदर्यगर्वोपि ज्ञापितः। किंच। लोचनस्य सायकरूपत्वात्तदुज्ज्वलीकरण
कथनेन युद्धोद्यमः सूचितः। किंच। नयनकुरंगेति। हे सुभवेष। सुभरूपः वेषो यस्य। एतेन कामसमरोपयो
गी वेषो निरूपितः। श्रुतिमंडले कुंडले निवेशाय। पूर्वं नियुद्धे स्रस्ते पुनरधुना यथापूर्वमेव धारयेत्यर्थः। की
दृशे श्रुतिमंडले नयनकुरंगयोर्यस्तरंगः अग्रगमनवेगस्तरलायांगरूपस्तस्य यो विकासस्तस्य निरासक
रे प्रतिबंधकारिणीत्यर्थः। यथा कुरंगश्च वेगेन धावन् अग्रे गर्तादिकं दृष्ट्वा परावर्त्तते तथा नयोरपि श्रुति यन
मंडलगर्तं दृष्ट्वा परावर्त्तनमिति भावः। एतेन नयनयोर्दैर्घ्यं चांचल्यं निरूपितं। ननु कदाचिदतिवेगेना
प्लुत्यापि कुरंगो याति तत्राह। मनसिजेति। मनसिजपाशस्य विलासं धरतीति तथाभूते तत्र पुनः
कामपाशभ्रमान्न अग्रे गच्छतीति भावः। तद्भयतः परावर्त्तते नो चेदुल्लंघ्यापि गच्छेदिति। अथवा। म
नसिजपाशेति कुंडलविशेषणं। एतेन कुंडले धारणेन तद्भ्रमादग्रे न चलतीति सूचितं। कामपाशेन
तादृशश्रुतिमंडलसौंदर्यालोकेन कामपाशे पततीति निरूपितं। किंच। भ्रमरचयेमिति। मममुखे नर्म
र्जेन जनकं सुखजनकं यथा स्यात्तथा अलंपरिकर्मय प्रसाधिलंकुरु। पूर्वं रतिसमरे वित्ततं करेणा
लंकुरु एतेन तत्करणे मध्येऽन्योपि विलासाः सूचिताः। अत एव नर्मजनकमिति युक्तं। कीदृशे मुखे

जितकमले विमलेच। पुनः कथंभूते संमुखे प्रसाधनार्थमेव संमुखीकृते। कथंभूतमलकं सुचिरं
यथास्यात्तथा भ्रमरचयं रचयंतं। यथा कमले भ्रमरा भवंति। तथा मुखकमले अलका आवृत्य ति
॥८७॥ ष्ठंतीति निरूपितं। अत एव रुचिरं मनोहरं क्रियाविशेषणं वा। एतेनालकप्रसाधनेकरकमलस्य
शाभिलाषोपिज्ञापितः। किंच। मृगमदेति। हे कमलानन विहिताकलंककला यस्मिन्। अथवा। वि
हितो यः कलंकस्तेन कलं यथा भवति तथा वो तिलकस्येन विशेषणं विहितो यः कलंकस्तद्वन्मधुरम
लिकरजनीकरे भालचंद्रे तिलकं कुरु। कीदृशं तिलकं मृगमदरसेन वलितं रचितं। ललितं मनोहरं की
दृशेतस्मिन् विभ्रमितः श्रमशीकरो यस्य एतावत्पर्यंतं रतिश्रमकणाः स्थिताः इदानीं त्वत्करप्रोंछना
दिना व्यजनाद्वा स्वाभाविकत्रिविधवायुना वा। ते निवृत्ता। अनस्तादृशे पुनस्त्वत्सौभाग्यद्योतकं तं कुवि
ति भावः। एतेन पूर्वश्रमनिवृत्तौ पुनर्युद्धार्थं सज्जीकरणोद्यमः सूचितः। किंच। चंद्रे यथा कलंकशोभाकर
एव भवति तथात्रापि शोभाधायक एव परश्यामत्वेन कलंकत्वमुक्तं। अत एव कलशपदं दत्तं। किंच। प्रिया
ननस्य कमलत्वनिरूपणात्स्वालिकस्य चंद्रत्वकथनाच्च तत्प्रकाशेन प्रियाननस्य संकोचो ज्ञापितः एवं ॥८७॥
सति सौंदर्यातिशयाभिनः प्रियस्य स्वाधीनत्वं च निरूपितं। एवं यथा यथा वदति तथा तथैव प्रियः क
रोतीति पुनस्तं वदति। मम रुचिर इति। हे मानद मम सन्मानमेव ददासि। अतो मम रुचिरे चिकुरे कुसु

मा निकुरु। कीदृशे चिकुरे मनसिजध्वजस्य चामरे यथा महासूरः स्वशौर्यज्ञापकं ध्वजे चामरादि चि
न्हं दधाति। अपरं तथा काम युद्ध शौर्य ज्ञापक चिन्हरूप चामरः चिकुर एवेति तथोक्तं। एतेन पुनः कुसुमशर
समर शौर्य चिन्ह सज्जीकरणेन प्रियस्यापि प्रतिपक्षित्वं ज्ञापितं। कीदृशे तस्मिन् रतिगलिते। यद्यपि त्वये
करारं जितं तच्चिन्हं शिथिलीकृतं तथापि पुनरिदानीं द्रष्टव्यमिति शौर्यगर्वोपि सूचित इति निगूढाशयः।
अत एव ललिते मनोहरे एतेन कान्तरत या तच्चिन्हस्यागोन कृत इति ध्वनितं तस्य लालित्य कथनेन। पुनः
कीदृशे शिखंड मयूरः तस्य शिखंडवत् डामर आटोपो यस्य। तद्वत् कोमलत्व दीर्घत्व चिक्कणत्वादि धर्माः सू
चिताः आटोपार्थक डामर पदेन शौर्याटोपोपि व्यंजितः। एवं युद्धोद्योग कवचादि धारणमपि क्रियतामिति सं
गतिमाह। सरसघन इति। रसं यथा स्यात्तथा घने। मम जघने कीदृशं वरवारणः काम स एव वारणः तस्य कं स
दं काम वारण वासस्थानमित्यर्थः। हे शुभाशय मणि रशना वसनाभरणानि वासय। अलंकृतानि कुरु। तत्र
स्थित काम बाण ग्रहणार्थं तद्द्वंद्व घन जालमिव प्रसारयेत्यर्थः। अत एव सुभाशयेति संबोधनं। तद्गुण कलासु
सुभ आशयो यस्य तादृश। पुनः कीदृशे। सुंदरे मनोहरे। एतेन तादृशे तत्र विचित्र कलाभिः रशनाद्यलंक
रणे परम शोभा भविष्यतीति सूचितं। किंच। यद्यप्यनेन युद्ध समये मां त्यक्त्वा गता इति वाससयोग्या न भ
वंति तथापि त्वं सुभाशय इति पुनर्वासयेति भावो व्यंजितः। एवं संपूर्ण शृंगारे जाते युद्धार्थं सज्जीभूतेति

जय

गीतमुपसंहरति। श्रीदेवेति। श्रवणोत्सुकं प्रतिवदति। तादृशो देवः श्रीकृष्णः तस्य वचसि मदं तस्थितः सए
॥८८॥ ववदतीति तस्यैव वचसि दयासहितं दैन्यसहितं यथास्यात्तथा हृदयं कुरु। एतेन परमं दैन्येन भावात्मकशर
णागत्या तादृशं हृदयं कुर्विति सूचितं। यदि हरिस्मरणे सरसं मन इत्युपक्रम्यात्रोपसंहारः कृत इति। कीदृशे
वचसि जयदेवएतच्छ्रवणेन स्वास्वभावविजयो भवतीति तथोक्तं। एतेन भावात्मकालौकिकस्वभावत्वाप्ति
वे दित्यवांतर फलं निरूपितं। अत एव मंडले अंतर्भावात्मकभूषणरूप इत्यर्थः। ननु पूर्वं प्रतिबंधकपापे
विद्यमाने कथमेतत्सिध्येत्तत्राह। हरिचरणेति। हरिचरणस्मरणमेवामृतं मोक्षरूपपरमानंदात्मकोरसस्तेन निर्मि
तं कलिकलुषज्वरखंडनं येन तादृशे। एतेन पूर्वस्मरणमात्रेण पापे निवृत्ते अंतस्तादृग्भावदानेन स्वभावपरावृत्तौस
त्यां परमानंदानुभवरूपं फलं सिध्यतीति निरूपितं। अथवा। काचन सखी पूर्वोक्तराधावचनश्रवणानंतरं श्रीकृष्णं प्रति
वदति। श्रीजयदेवेति। श्रिया जयेन दीव्यतीति कामजयेन त्वद्रसभरजनितानंदसौभाग्यवशेन तथा वदतीति मंडने
मंडनकरणार्थे सदयहृदयं कुरु न तु तत्कथनमनुचितत्वेन भावनीयं। दयया तथैव कर्तव्यत्वदीयत्वादिति भावः। अ ॥८८॥
न्यच्च। पूर्वं जीवयमृतमिव दासमिति भवते वोक्तत्वाद्रसस्य तथैव सिद्धत्वाच्च दयैव कर्तव्येति सूचितं। तत्र हेतु
गर्भं विशेषणमाह। हरिचरणेति। हरिदुःखहर्त्री यच्चरणं मंडनरूपपरिचरणं तस्य यत्स्मरणं प्रियाकृतं तदेवामृतं।
एवं यो दास्यं करोति सममापि प्रियं न करिष्यतीति स्मरणमेवामृतं जीवदानं भवतीति। तेन मितं कलिकलुषज्वरखं

डनंकरुहजनितज्वरखंडनंयत्रांताहशे।एवंकरणेनपूर्वोक्तिकरुहजनितांतरस्तापोगमिष्यतीतितथाविधेय
मितिभावः।एवंसखीवचनंश्रुत्वाईषत्स्मितवदनापूर्वोक्तिमेवपुनरुक्तवतीत्याह।रचयेति।कुचयोश्चित्रंरचयक
पोलयोःपत्रंकुरुघ्नःजघनेकांचींघटय।मुग्धस्रजाकबरीभरंरचय।वलयश्रेणीपाणौकुरुयन्नूपुरोपदेकुरु।इ
तिप्रिययानिगदितःप्रीतःपरमप्रेममयुक्तः।पीतांबरोपितथाऽकरोत्।करणेहेतुनिरुपयिप्रेम।उद्बुद्धरसात्मकत्वं
चेतिएवंविविधबंधरचनाभिःप्रिययासहसर्वदाविरहतीतिलोकप्रकटितलीलामुपसंहरतीकाचनंसुखी
कुंजांतरेणपठितवतीत्याह।पर्यंकीकृतेति।एवमुपाचितोभूतोरतिबंधयुक्तोहरिःपातु।कथंभूतः।पर्यंकी
कृतायःनागनायकःशेषस्यफणाश्रेणीछत्रवदुपर्यगतातत्संबंधिमणिनांगणेयःसंक्रांतःप्रतिबिंबस्तस्यय
त्संचलतांचपलसातयाविभुप्रक्रियांसर्वतःसाकारव्यापकंब्रह्मश्रुतिसिद्धमेवनकेनापिद्रष्टमीतिदानींतत्प्रक
टावालोकयंत्वितितथाकरोतीतिसूचितं।तत्रापिस्वस्यतथाकरणेप्रयोजनमाह।अक्ष्णामिति।अक्ष्णांशतैःकृ
त्वापादांभोरुहचारिणीयावारिधिसुतालक्ष्मीःतांदिदृक्षुःकायव्यूहमिवारचन्कुर्वन्।एकरूपेणतद्दर्शनदृश्य
भावात्तथाकृतवानितिभावः।एतेनरसात्मकतापिनिरूपिता।अथवा।अत्रभावांतरमपिसखीनांसूचयति।
एवंभूतोहरिःवःपातु।कीदृशःपर्यंकीकृतोयोनागमनायकःमहाश्यामभुजंगः।रतिशयेनविततकचनिकरः
तस्यफणाश्रेणीउत्तमांगोपरिभालप्रदेशावधियाशोभातत्रयामणयःअलंकारार्थंविरचिताःभूषणरूपाःतासां

गणे संक्रांतः स्वप्रतिबिंबस्तस्य संचलनं यथा यथा स्वस्य चलनं तथा प्रतिबिंबस्यापि भवतीति तादृशौ। विभुप्रक्रि
॥८८॥ यां विभ्रत। एतेनैतादृशलीलासहितमेव नित्यसाकारं ब्रह्मेति सूचितं। वपुरीति पाठे स्फुटमेव तावद्रूपत्वं दधिदि
त्यर्थः। तत्करणप्रयोजनमाह। अक्ष्णांशतैः पादांभोरुहचारिणी या लक्ष्मीः प्रियायाः सा इदानीं रतिबंधसमये
नायकपश्चाद्भागे भवति। नूपुरहंसकमुद्रिकादिविरचिताः तां दिदृक्षुः कायव्यूहमिवारचयन्। तच्छोभादर्शना
र्थमेव तावद्रूपत्वं कृतवानित्यर्थः। एवंभुपचितीभूतो रतिनिबद्धः वः सर्वदा पातु। एतदनुभवं कारयन् सर्वदा र
क्षतु। अवतारलीलायां कदाचिन्मानादिदशायामंतरायो भवति नित्यलीलास्थितौ सर्वदा परमानंदानुभव एवे
ति तथोक्तं। बाह्याभ्यंतरमेकरूपेव स्थितिरिति भावः। एवं पूर्वोपसंहारेण नित्यलीलास्थितिप्रस्तावह्याशीर्वादो नि
रूपितः। एवं विहारानंतरममलतरकुसुमनिकररमणीयधवलतरप्रभोद्भासितनिकुंजसदनस्थिता ईषद्विहसि
तामृतचंद्रिकाकुलीकृतप्रियनयनचकोरामंदत्रपानतीकृतविलोचनांतविलोकनपरा ईषन्मानेन नर्मपरिहास
मध्वरतरां विलोक्य प्रियो यत्कृतवान् तदनुवादरूपकाव्यं पठितवानित्याह। त्वामप्राप्येति। पुरा त्वं लक्ष्मीरूपा
क्षीरोदतीरा जज्ञा तातदा सर्वान् विहायमपि स्वयंवरपरा त्वमासीस्तदा त्वामप्राप्य मूढः समुद्रानीपतिः यद्यपि ॥८८॥
सापि परमसुंदरी तथापि कालकूटमपिबदिति शंकेनाचो त्योनऽन्यत्कारणं न पश्यामि। एतेन लक्ष्मीप्राप्त्यभा
वेन तु मेव तथा कृतवानित्यर्थः सूचितः। इत्थं पूर्वकथाभिः कृत्वा अन्यमनसः अन्यत्र गतं मनो यस्याः एतेनातः

परंरसंनदास्यामीतिभावो विस्मृतइतिव्यंजितं। तादृशयाराधयावक्षोंचलंविक्षिप्यदूरीकृत्यस्तनकोरकोप
रिमिलन्नेत्रयुगलमग्रभागंकुचयुगलत्रांषुमेवप्रदर्शयन्निसर्थः। अयंशंभुःस्फुटमेवकालकूटमपिबदितिचू
चुकशोभयानिश्चीयतइतिहरिस्तादृग्विलासकौतुकानंदकारित्वेनवःपातु। एवंसर्वदाविविधविहारोनिरू
पितः। किंच। सतुमृडानीपतिःस्वयमेवतामसःपुनर्मायारूपायाःपतिःतादृशस्यमोहएवभवेन्नतुतत्प्रा
प्तिर्भवतीतिविषपानमुचितमेव। अमृतंतुत्वच्चरणसेवयाप्राप्यतेतन्मयाप्राप्तं। अतएवस्वयंवरपरामित्यु
क्तं। नकेनचित्साधनेनविधिनावा। एतेनायंरसःशुद्धनिरुपधिभक्तिमार्गीयदास्येनतत्रापित्वत्प्रसादेनप्राप्य
नान्यथेतिनिगूढाशयोज्ञापितः। किंच। त्वत्प्रसादादेवप्रतिबंधवक्षोंचलनिवारणेनदानमेवफलंप्राप्तमितिवि
क्षिप्यवक्षोंचलमितिकथनेसूचितं। अतःपरंकविःप्रबंधमुपसंहरति। यद्गांधर्वेति। गांधर्वकलासुयत्कौशलं
नाद्यशास्त्रोक्तंतदनुतत्लक्षीकृत्यवैष्णवंध्यानं। विष्णुशब्देनरसात्मकःपुरुषोत्तमःउक्तःतादृशंवैष्णवंध्यानं
रागतानतालस्वरालापमूर्छनोद्ग्राहसहितंचिंतनं। पुनर्यतश्शृंगारविवेकस्यतत्वंयादृशंरसस्वरूपंतादृश
मपिअखिलंसर्वप्रकारभेदसहितं। अथवयत्पुनःकाव्येषुलीलायितंनिरूपितं। तत्सर्वंजयदेवपंडितकवेः
संबंधिनःश्रीगीतगोविंदतःसुधियःशोभनमतियुक्ताःभगवत्संबंधित्वमेवमतेःशोभनत्वं। तादृशाःपरिशोध
यंतु। यस्ययदपेक्षितंतस्यतत्सर्वमत्रास्तीतितद्विलोक्यग्रह्णंतु। तत्रापिसानंदाःयदेवापेक्षितंतच्छास्

चानंदसहिताः संतस्तथेत्यर्थः। सुधियइति। कथनेन भगवत्संबंधित्वाभावेपि रिंशोधनेन तत्प्राप्तिर्भविष्य
॥८०॥ तीतिसआनंदोपित्तथेतिसूचितं। पंडितपदेन स्वस्मिन्समस्तश्रुतिप्रतिपाद्यभगवत्स्वरूपज्ञानं ज्ञापितं। क
विपदेनचरसात्मकज्ञानेनतादृशगुणवर्णनसामर्थ्यंद्योतितं। एवंसतितादृशशोभनमतिपूर्वकविशोध
नादानंदप्राप्तिरूपंग्रंथफलमुक्तं। इदानीं निखिलवस्तुमाधुर्यविस्मारकत्वेनस्वप्रबंधंकविःस्तौति। सा
ध्वी माध्वीकेति। यावज्जयदेवस्यवचसिश्रृंगारएवसारोयत्रतादृशंभावंविश्वक्सर्वतःदेहप्राणेंद्रियेषु
स्यतएवसाधनंविनैवइहधरित्रीं पांयछंति। वितरंति। एतेवेतच्छ्रवणमात्रेणभगवतिरसात्मकभावोभवती
तिज्ञापितं। तावद्धरणीसंबंधिसकलामधुरपदार्थानांपरिहारइतितेषामप्रयोजकत्वमाह। हेमाध्वीकतव
चिंताइदानींसाध्वीनसध्रीचीनानः। तवमाधुर्यंरसनेंद्रियास्वाद्यं एतन्माधुर्यंतुकेवलमंतःकरणास्वा
द्यमितित्यागउचितएवेतितथा। हेशर्करेत्वंतुकर्करैवासीतितत्त्वापिनविचारः। अथहेद्राक्षेत्वांकेद्रक्ष्यंति।
अपितुनकेपीत्यर्थः। हेअमृतत्वंनाम्नैवामृतंवस्तुतोमृतमेव। यतएतद्भावजनितनापतप्तानां जीवनकर्तृ
सामर्थ्याभावात्तथात्वमेव। हेक्षीरत्वंरसस्तुनीरंजलमेव। हेमाकंदत्वंतुक्रंदकोकिलादिकूजनमिषेणक्रंदप्र ॥८०॥
लापंकुरु। तथापितवमाधुर्यंनकेनाप्यास्वाद्यमिदानीं। हेकांताधरत्वंतुधरणितलंगच्छअधःपतेतिभावः। विष
यवासनाया अपिनिवृत्तत्वात्। एवंसर्वेषांपरिहारउक्तः। तेन। लौकिकमाधुर्यंनिरूपितं। जयदेवकविवच

चसामितिसर्वमवदात॥ ॥श्रीगोपीजनवल्लभवल्लभचरणारविंदसंस्मरणात्।मतिरभवन्ममाश्रितमगा
॥८१॥ धहरिकेलिभवाब्धौ॥१॥अहंजानेखैरंविहरणवशादेवमयिचाप्ययाम्येरक्ताभूत्प्रभुचरणपाथोजकरणा।नेच
दवंलीलाललितगुणाभावाःस्फुटतराभवेयुर्नोनूनंममनिगमगेढैकगतयः॥२॥यदत्रकिंचिद्विमतंसंतः
सौहार्दशीलता।संस्कारयंतुदययाक्षमंतांप्रभवोपितत्॥३॥ ॥इतिश्रीपंचनदान्वयवर्यैद्दामकविदामोद
रभट्टसूनुगोपालभट्टविरचितायांगीतगोविंदटीकायांगूढार्थदीपिकायांसुप्रीतपीतांबरोनामद्वादशःसर्गःस
माप्तः॥शुभंभवतु।श्रीरस्तु॥

॥८१॥

इति गीतगोविन्द टीकायां अर्थदीपिका समाप्ता ॥

—(गोपालभट्टः)